QZ8RDB

प्रथमः पाठः

# वार्तालापः (खण्ड–अ)

## 1. मित्रस्य परिचयः



सरोवरः — नमो नमः, भवतः किं नाम अस्ति?

विभवः — मम नाम विभवः अस्ति।

सरोवरः — किं भवतः प्रियविषयः?

विभवः — संस्कृतम् इति मम प्रियविषयः।

सरोवरः — भवान् कुत्र गच्छति?

विभवः — अहं जगदलपुरं गच्छामि।

सरोवरः — कथम्?

विभवः — बस्तरस्य सौन्दर्यं द्रष्टुं गच्छामि।

सरोवरः — बस्तरे बहूनि दर्शनीयानि स्थलानि सन्ति। किं दर्शनीयस्थलं द्रष्टुम् इच्छसि?

विभवः — अहं तीरथगढप्रपातं द्रष्टुम् इच्छामि।

## 2. कक्षायां छात्राणां सम्भाषणम्

वशीमः — नदीम! भवतः किं करोति?

नदीमः — अहं संस्कृतं पठामि।

वशीमः — श्वः सायंकाले भवान् कुत्र मिलिष्यति?

नदीमः — श्वः सायंकाले अहं स्वगृहे मिलिष्यामि।

वशीमः — नदीम! भवान् सत्यं वदति किम्?
भवान् जशपुरं गमिष्यति, परश्वः आगमिष्यति।

नदीमः — अहं तु विस्मृतवान्।

नीरजः — किशन ! अद्य मम गृहम् आगच्छतु। सम्यक् पठिष्यावः।

किशनः — भवन्तः मम गृहम् आगच्छन्तु। सर्वे मिलित्वा क्रीडिष्यामः।

## 3. गुरु–शिष्ययोः संवादः



गुरुः – भवतः किं नाम अस्ति?

शिष्य : – महोदय! मम नाम सज्जीवः अस्ति।

गुरुः – भवान् कुतः आगच्छति?

शिष्यः – अहं रायपुरनगरात् आगच्छामि।

गुरुः – भवतः पितुः किं नाम अस्ति?

शिष्यः – महोदय! मम पितुः नाम महेन्द्रः अस्ति।

गुरुः – त्वं कस्यां कक्षायां पठसि?

शिष्यः – अहं दशम्यां कक्षायां पठामि।

## 4. उद्याने वार्तालापः

रणधीरः – रणवीर! भवान् कुत्र गच्छति?

रणवीरः – अहम् उद्यानं प्रति गच्छामि।

रणधीरः – किमर्थम्?

रणवीरः – भ्रमणार्थम्?

रणधीरः – प्रातःकाले भ्रमणं मह्यम् अपि रोचते।

रणवीरः – तर्हि भवान् चलतु।

रणधीरः – बाढम्! अहमपि चलामि।

## 5. पर्यावरणस्य रक्षणम्



पूजा – भो प्रिये! त्वं किं पश्यसि?

प्रिया – एतान् वृक्षान् पश्यामि।

पूजा – एतान् वृक्षान् के आरोपितवन्तः?

प्रिया – अस्माकं पूर्वजाः आरोपितवन्तः।

पूजा – अस्माकम् अपि कर्त्तव्यं वर्तते,
वयम् अपि पादपान् रोपयाम।

प्रिया – त्वं सत्यं कथयसि।

पूजा – किं त्वं फलानि खादितुम् इच्छसि?

प्रिया — आम्।

पूजा — तर्हि त्वम् अपि एकम् पादपम् आरोपय।

## 6. क्रीडाविषये सम्भाषणम्

प्रवरः — प्रखर! भवान् कुत्र गच्छति?

प्रखरः — अहम् उद्यानं प्रति गच्छामि।

प्रवरः — किमर्थम्?

प्रखरः — क्रीडनार्थम्।

प्रवरः — प्रातःकाले क्रीडनं मह्यम् अपि रोचते।

प्रखरः — तर्हि भवान् मया सह एव चलतु।

प्रवरः — नहि, अहं स्व पित्रा सह उपवने गच्छामि।

प्रखरः — उचितम्! , श्वः आवां प्रातः क्रीडनाय उद्यानं प्रति गमिष्यावः।

## 7. माता–पुत्रयोः सम्भाषणम्



माता — मोहित! किं करोषि त्वम्?

पुत्रः — संस्कृतं पठामि मातः।

माता — त्वया भोजनं कृतं किम्?

पुत्रः — आम्

माता — आपणं गच्छसि किम्?

पुत्रः — मातः शीघ्रं गच्छामि। किम् आनयानि ततः।

## 8. नगर– भ्रमणम्

परागः — भूपेश! त्वं भ्रमणाय कुत्र गमिष्यसि?

भूपेशः — कोरबानगरं प्रति गमिष्यामि।

परागः — कदा गमिष्यसि?

भूपेशः — ग्रीष्मावकाशे अहं गमिष्यामि।

परागः — केन यानेन?

भूपेशः — रेलयानेन।

परागः — कोरबानगरं किमर्थं प्रसिद्धम्?

भूपेशः — अत्र राष्ट्रिय–तापविद्युतकेन्द्रमस्ति। अतएव प्रसिद्धम्।

## 9. वैद्य–रोगी सम्भाषणम्



वैद्यः — भो मुकुल! त्वं कथम् असि?

रोगी — अहं कुशली नास्मि।

वैद्यः — किम् अभवत्?

रोगी — ज्वरेण पीडितोऽस्मि।

वैद्यः — अहं तु त्वां ज्वरौषधिं दास्यामि।

रोगी — धन्यवादः महोदयः।

## 10. संस्कृतव्याकरणविषये वार्तालापः

मणिका — त्वं किं पठसि?

भारती — अहं संस्कृतं पठामि।

मणिका — संस्कृतस्य कः अध्यायः?

भारती — केवलं व्याकरणम् एव।

मणिका — व्याकरणे एव तव रुचिः।

भारती — व्याकरणं तु मह्यम् अतीव रोचते।

मणिका — व्याकरणं तु भाषायाः आधारभूतं भवति।

भारती — त्वं सत्यं कथयसि।

मणिका — अधुना अहं चलितुम् इच्छामि।

भारती — उपविश। पेयं पीत्वा गच्छ।

मणिका — क्षम्यताम् इदानीं गच्छामि।

## शब्दार्थाः

| | | |
|---|---|---|
| भवान | = | आप |
| श्वः | = | आने वाला कल |
| परश्वः | = | आने वाला परसों |
| विस्मृतः | = | भूल गया |
| सम्यक् | = | अच्छी तरह से |
| कुतः | = | कहाँ से? |
| आम् | = | हाँ |
| किमर्थम् | = | किसलिए |
| क्रीडनम् | = | खेलना |
| तर्हि | = | तो |
| भ्रमणार्थम् | = | घूमने के लिए |
| बाढम् | = | अच्छा |
| आरोपितवन्तः (आ+रुह्+णिच्+क्तवतु) | = | रोपण किये |
| रोपयाम (लोट्लकार उत्तमपुरुष बहुवचन) | = | रोपण करें |
| यानेन | = | वाहन से (साधन से) |
| अधुना | = | अभी/अब/इस समय |
| इदानीम् | = | अब, इस समय |

## अभ्यासः

1. संस्कृत भाषया उत्तरत –

(क) विभवः कं प्रपातं द्रष्टुम् इच्छति?

(ख) रणधीराय किं रोचते?

(ग) अस्माकं कर्त्तव्यं किम्?

(घ) कोरबानगरं किमर्थं प्रसिद्धम्?

(ङ.) भारत्यै किम् अतीव रोचते?

2. अधोलिखितानां शब्दानां मूलशब्द–विभक्तिवचन–लिङ्गानि लिखत –

| | शब्दरुपम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| यथा– | भवतः | भवत् | पुल्लिंङ्ग | षष्ठी | एकम् |
| 1. | बस्तरे | ––––– | ––––– | ––––– | ––––– |
| 2. | कक्षायाम् | ––––– | ––––– | ––––– | ––––– |
| 3. | सर्वे | ––––– | ––––– | ––––– | ––––– |
| 4. | कस्याम् | ––––– | ––––– | ––––– | ––––– |
| 5. | पित्रा | ––––– | ––––– | ––––– | ––––– |
| 6. | यानेन | ––––– | ––––– | ––––– | ––––– |

3. अधोलिखितानां पदानां धातुलकारपुरुषवचनानि लिखत–

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| यथा– | गच्छति | गम् | लट् | प्रथमः | एकम् |
| 1. | इच्छामि | ––––– | ––––– | ––––– | ––––– |
| 2. | मिलिष्यति | ––––– | ––––– | ––––– | ––––– |
| 3. | आगच्छतु | ––––– | ––––– | ––––– | ––––– |
| 4. | रोचते | ––––– | ––––– | ––––– | ––––– |
| 5. | आरोपय | ––––– | ––––– | ––––– | ––––– |

4. सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| 1. | बस्तरे | – | (क) क्रीडिष्यामः |
| 2. | सर्वे मिलित्वा | – | (ख) गच्छसि |
| 3. | त्वं कुत्र | – | (ग) तीरथगढप्रपातम् |
| 4. | ज्वरेण | – | (घ) आरोपितवन्तः |
| 5. | एतान् वृक्षान् | – | (ङ) पीडितोऽस्मि |

5. रिक्तस्थानानि पूरयत –

1. अहं .....................कक्षायां पठामि।
2. क्रीडनं .....................अपि रोचते।
3. त्वम् अपि एकं ..........................आरोपय।
4. अहं त्वाम् .............................दास्यामि।
5. .............................तु भाषायाः आधारः भवति।

6. संस्कृतभाषया अनुवादं कुरुत –

1. आपका नाम क्या है?
2. मैं संस्कृत पढ़ता हूँ।
3. वशीम परसों आयेगा।
4. आप मेरे साथ ही चलिए।
5. बैठो, पेयपदार्थ पीकर जाओ।

7. प्रकृतिप्रत्ययौ पृथक् कुरुत –

यथा – द्रुष्टुम् = दृश् + तुमुन्

1. विस्मृतवान् =
2. मिलित्वा =
3. खादितुम् =
4. कृतम् =
5. पठन् =

8. अधोलिखितेषु वाक्येषु अव्ययपदानि चित्वा लिखत–

1. भवान् कुत्र गच्छति ?
2. रामः हयः विद्यालयं गतवान्।
3. अद्य मम गृहम् आगच्छतु।
4. राहुलेन सह एव क्रीडतु।
5. यदा श्रेया क्रीडति तदा सीता पठति।

# संस्कृत गीतम् (खण्ड–ब)

## भारतं भारतं भवतु भारतम्

भारतं भारतं। भवतु भारतम्।
शस्त्रधारकं शास्त्रधारकं
शस्त्रशास्त्रधारकं भवतु भारतम्।
भारतम् ............ । 1 ।

कर्मनैष्ठिकं धर्मनैष्ठिकं
कर्मधर्मनैष्ठिकम्।
भारतम्............ । 2 ।

मुक्तिदायकं भक्तिदायकं
मुक्तिभक्तिदायकम्।
भारतम्............ । 3 ।

शान्तिदायकं शक्तिदायकं
शान्तिशक्तिदायकम्।
भारतम्............ । 4 ।

QZHMEY

————000————